# Shri Raghavendra Stotram

# શ્રીરાઘવેન્દ્રસ્તોત્રમ્

## Document Information

Text title : rAghavendra_stotra.inf

File name : rAghavendra_stotra.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Author : Sri Appannaacharya

Transliterated by : Shrisha Rao <shrao at dvaita.org> http://www.dvaita.net

Proofread by : Shrisha Rao <shrao at dvaita.org>, Kesava Tadipatri <ktadipatri at dvaita.net>

Latest update : March 20, 1996, April 10, 2009

Send corrections to : sanskrit@cheerful.com, shrao@dvaita.org, or info@dvaita.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રસ્તોત્રમ્

શ્રીપૂર્ણબોધગુરુતીર્થપયોબ્ધિપારા કામારિમાક્ષવિષમાક્ષશિરઃ સ્પૃશન્તી ।
પૂર્વોત્તરામિતતરઙ્ગચરત્સુહંસા દેવાળિસેવિતપરાઙ્ઘ્રિપયોજલગ્ના ॥ ૧॥

જીવેશભેદગુણપૂર્તિજગત્સુસત્ત્વ નીચોચ્ચભાવમુખનક્રગણૈઃ સમેતા ।
દુર્વાદ્યજાપતિગિળૈર્ગુરુરાઘવેન્દ્રવાગ્દેવતાસરિદમું વિમલીકરોતુ ॥ ૨॥

શ્રીરાઘવેન્દ્રઃ સકલપ્રદાતા સ્વપાદકઞ્જદ્વયભક્તિમદ્ભ્યઃ ।
અઘાદ્રિસમ્ભેદનદૃષ્ટિવજ્રઃ ક્ષમાસુરેન્દ્રોઽવતુ માં સદાઽયમ્ ॥ ૩॥

શ્રીરાઘવેન્દ્રોહરિપાદકઞ્જનિષેવણાલ્લબ્ધસમસ્તસમ્પત્ ।
દેવસ્વભાવો દિવિજદ્રુમોઽયમિષ્ટપ્રદો મે સતતં સ ભૂયાત્ ॥ ૪॥

ભવ્યસ્વરૂપો ભવદુઃખતૂલસઙ્ઘાગ્નિચર્યઃ સુખધૈર્યશાલી ।
સમસ્તદુષ્ટગ્રહનિગ્રહેશો દુરત્યયોપપ્લવસિન્ધુસેતુઃ ॥ ૫॥

નિરસ્તદોષો નિરવદ્યવેષઃ પ્રત્યર્થિમૂકત્ત્વનિદાનભાષઃ ।
વિદ્વત્પરિજ્ઞેયમહાવિશેષો વાગ્વૈખરીનિર્જિતભવ્યશેષઃ ॥ ૬॥

સન્તાનસમ્પત્પરિશુદ્ધભક્તિવિજ્ઞાનવાગ્દેહસુપાટવાદીન્ ।
દત્ત્વા શરીરોત્થસમસ્તદોષાન્ હત્ત્વા સ નોઽવ્યાદ્ગુરુરાઘવેન્દ્રઃ ॥ ૭॥

યત્પાદોદકસઞ્ચયઃ સુરનદીમુખ્યાપગાસાદિતા-
સઙ્ખ્યાઽનુત્તમપુણ્યસઙ્ઘવિલસત્પ્રખ્યાતપુણ્યાવહઃ ।
દુસ્તાપત્રયનાશનો ભુવિ મહા વન્ધ્યાસુપુત્રપ્રદો
વ્યઙ્ગસ્વઙ્ગસમૃદ્ધિદો ગ્રહમહાપાપાપહસ્તં શ્રયે ॥ ૮॥

યત્પાદકઞ્જરજસા પરિભૂષિતાઙ્ગા યત્પાદપદ્મમધુપાયિતમાનસા યે ।
યત્પાદપદ્મપરિકીર્તનજીર્ણવાચસ્તદ્દર્શનં દુરિતકાનનદાવભૂતમ્ ॥ ૯॥

સર્વતન્ત્રસ્વતન્ત્રોઽસૌ શ્રીમધ્વમતવર્ધનઃ ।
વિજયીન્દ્રકરાબ્જોત્થસુધીન્દ્રવરપુત્રકઃ ।

શ્રીરાઘવેન્દ્રો યતિરાટ્ ગુરુર્મે સ્યાદ્ભયાપહઃ ॥ ૧૦॥

જ્ઞાનભક્તિસુપુત્રાયુઃ યશઃ શ્રીપુણ્યવર્ધનઃ ।
પ્રતિવાદિજયસ્વાન્તભેદચિહ્નાદરો ગુરુઃ ।
સર્વવિદ્યાપ્રવીણોઽન્યો રાઘવેન્દ્રાન્નવિદ્યતે ॥ ૧૧॥

અપરોક્ષીકૃતશ્રીશઃ સમુપેક્ષિતભાવજઃ ।
અપેક્ષિતપ્રદાતાઽન્યો રાઘવેન્દ્રાન્નવિદ્યતે ॥ ૧૨॥

દયાદાક્ષિણ્યવૈરાગ્યવાક્પાટવમુખાઙ્કિતઃ ।
શાપાનુગ્રહશક્તોઽન્યો રાઘવેન્દ્રાન્નવિદ્યતે ॥ ૧૩॥

અજ્ઞાનવિસ્મૃતિભ્રાન્તિસંશયાપસ્મૃતિક્ષયાઃ ।
તન્દ્રાકમ્પવચઃકૌણ્ઠ્યમુખા યે ચેન્દ્રિયોદ્ભવાઃ ।
દોષાસ્તે નાશમાયાન્તિ રાઘવેન્દ્રપ્રસાદતઃ ॥ ૧૪॥

‘ૐ શ્રી રાઘવેન્દ્રાય નમઃ’ ઇત્યષ્ટાક્ષરમન્ત્રતઃ ।
જપિતાદ્ભાવિતાન્નિત્યં ઇષ્ટાર્થાઃ સ્યુર્નસંશયઃ ॥ ૧૫॥

હન્તુ નઃ કાયજાન્દોષાનાત્માત્મીયસમુદ્ભવાન્ ।
સર્વાનપિ પુમર્થાંશ્ચ દદાતુ ગુરુરાત્મવિત્ ॥ ૧૬॥

ઇતિ કાલત્રયે નિત્યં પ્રાર્થનાં યઃ કરોતિ સઃ ।
ઇહામુત્રાપ્તસર્વેષ્ટો મોદતે નાત્ર સંશયઃ ॥ ૧૭॥

અગમ્યમહિમા લોકે રાઘવેન્દ્રો મહાયશાઃ ।
શ્રીમધ્વમતદુગ્ધાબ્ધિચન્દ્રોઽવતુ સદાઽનઘઃ ॥ ૧૮॥

સર્વયાત્રાફલાવાપ્ત્યૈ યથાશક્તિપ્રદક્ષિણમ્ ।
કરોમિ તવ સિદ્ધસ્ય વૃન્દાવનગતં જલમ્ ।
શિરસા ધારયામ્યદ્ય સર્વતીર્થફલાપ્તયે ॥ ૧૯॥

સર્વાભીષ્ટાર્થસિદ્ધ્યર્થં નમસ્કારં કરોમ્યહમ્ ।
તવ સઙ્કીર્તનં વેદશાસ્ત્રાર્થજ્ઞાનસિદ્ધયે ॥ ૨૦॥

સંસારેઽક્ષયસાગરે પ્રકૃતિતોઽગાધે સદા દુસ્તરે ।
સર્વાવદ્યજલગ્રહૈરનુપમૈઃ કામાદિભઙ્ગાકુલે ।
નાનાવિભ્રમદુર્ભ્રમેઽમિતભયસ્તોમાદિફેનોત્કટે ।
દુઃખોત્કૃષ્ટવિષે સમુદ્ધર ગુરો મા મગ્નરૂપં સદા ॥ ૨૧॥

રાઘવેન્દ્રગુરુસ્તોત્રં યઃ પઠેદ્ભક્તિપૂર્વકમ્ ।
તસ્ય કુષ્ઠાદિરોગાણાં નિવૃત્તિસ્ત્વરયા ભવેત્ ॥ ૨૨॥

અન્ધોઽપિ દિવ્યદૃષ્ટિઃ સ્યાદેડમૂકોઽપિ વાગ્પતિઃ ।
પૂર્ણાયુઃ પૂર્ણસમ્પત્તિઃ સ્તોત્રસ્યાસ્ય જપાદ્ભવેત્ ॥ ૨૩॥

યઃ પિબેજ્જલમેતેન સ્તોત્રેણૈવાભિમન્ત્રિતમ્ ।
તસ્ય કુક્ષિગતા દોષાઃ સર્વે નશ્યન્તિ તત્ક્ષણાત્ ॥ ૨૪॥

યદ્બૃન્દાવનમાસાદ્ય પઙ્ગુઃ ખઞ્જોઽપિ વા જનઃ ।
સ્તોત્રેણાનેન યઃ કુર્યાત્પ્રદક્ષિણનમસ્કૃતિ ।
સ જઙ્ઘાલો ભવેદેવ ગુરુરાજપ્રસાદતઃ ॥ ૨૫॥

સોમસૂર્યોપરાગે ચ પુષ્યાર્કાદિસમાગમે ।
યોઽનુત્તમમિદં સ્તોત્રમષ્ટોત્તરશતં જપેત્ ।
ભૂતપ્રેતપિશાચાદિપીડા તસ્ય ન જાયતે ॥ ૨૬॥

એતત્સ્તોત્રં સમુચ્ચાર્ય ગુરોર્વૃન્દાવનાન્તિકે ।
દીપસંયોજનાજ્ઞાનં પુત્રલાભો ભવેદ્ધ્રુવમ્ ॥ ૨૭॥

પરવાદિજયો દિવ્યજ્ઞાનભક્ત્યાદિવર્ધનમ્ ।
સર્વાભીષ્ટપ્રવૃદ્ધિસ્સ્યાન્નાત્ર કાર્યા વિચારણા ॥ ૨૮॥

રાજચોરમહાવ્યાઘ્રસર્પનક્રાદિપીડનમ્ ।
ન જાયતેઽસ્ય સ્તોત્રસ્ય પ્રભાવાન્નાત્ર સંશયઃ ॥ ૨૯॥

યો ભક્ત્યા ગુરુરાઘવેન્દ્રચરણદ્વન્દ્વં સ્મરન્ યઃ પઠેત્ ।
સ્તોત્રં દિવ્યમિદં સદા નહિ ભવેત્તસ્યાસુખં કિઞ્ચન ।
કિં ત્વિષ્ટાર્થસમૃદ્ધિરેવ કમલાનાથપ્રસાદોદયાત્ ।
કીર્તિર્દિગ્વિદિતા વિભૂતિરતુલા સાક્ષી હયાસ્યોઽત્ર હિ ॥ ૩૦॥

ઇતિ શ્રી રાઘવેન્દ્રાર્ય ગુરુરાજપ્રસાદતઃ ।
કૃતં સ્તોત્રમિદં પુણ્યં શ્રીમદ્ભિર્હ્યપ્પણાભિદૈઃ ॥ ૩૧॥

ઇતિ શ્રી અપ્પણાચાર્યવિરચિતં શ્રીરાઘવેન્દ્રસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ ભારતીરમણમુખ્યપ્રાણાન્તર્ગત શ્રીકૃષ્ણાર્પણમસ્તુ ॥

Encoded and proofread by Shrisha Rao shrao@dvaita.org
See http://www.dvaita.net for additional information.

*Shri Raghavendra Stotram*

pdf was typeset on December 23, 2021

Please send corrections to *sanskrit@cheerful.com*